# Shri Garuda Dandakam

# શ્રીગરુડદણ્ડકમ્

## Document Information

Text title : Garuda Dandakam

File name : garuDadaNDaka.itx

Category : daNDaka, deities_misc, stotra, vedAnta-deshika, vishhnu, vishnu

Location : doc_deities_misc

Author : vedAntadeshikA

Transliterated by : Prasanna Vijay pvsvr84 at gmail.com

Proofread by : Prasanna Vijay pvsvr84 at gmail.com

Latest update : December 1, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2024

*sanskritdocuments.org*

# શ્રીગરુડદણ્ડકમ્

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।
શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તચાર્યવર્યો મે સન્નિધત્તામ્ સદાહૃદિ ॥

નમઃ પન્નગનદ્ધાય વૈકુણ્ઠવશવર્તિને ।
શ્રુતિસિન્ધુ સુધોત્પાદમન્દરાય ગરુત્મતે ॥ ૧॥

ગરુડમખિલવેદનીડાધિરૂઢમ્ દ્વિષત્પીડનોત્કણ્ઠિતાકુણ્ઠવૈકુણ્ઠપીઠીકૃત
સ્કન્ધમીડે સ્વનીડાગતિપ્રીતરુદ્રાસુકીર્તિસ્તનાભોગગાઢોપગૂઢ
સ્ફુરત્કણ્ટકવ્રાત વેધવ્યથાવેપમાન દ્વિજિહ્વાધિપાકલ્પવિષ્ફાર્યમાણ
સ્ફટાવાટિકા રત્નરોચિશ્છટા રાજિનીરાજિતં કાન્તિકલ્લોલિનીરાજિતમ્ ॥ ૨॥

જયગરુડ સુપર્ણ દર્વીકરાહાર દેવાધિપાહારહારિન્
દિવૌકસ્પતિક્ષિપ્તદમ્ભોળિધારાકિણાકલ્પ કલ્પાન્તવાતૂલ કલ્પોદયાનલ્પ
વીરાયિતોદ્યચ્ચમત્કાર દૈત્યારિ જૈત્રધ્વજારોહનિર્ધારિતોત્કર્ષ
સઙ્કર્ષણાત્મન્ ગરુત્મન્ મરુત્પઞ્ચ કાધીશ સત્યાદિમૂર્તે ન કશ્ચિત્
સમસ્તે નમસ્તે પુનસ્તે નમઃ ॥ ૩॥

નમ ઇદમજહત્સપર્યાય પર્યાયનિર્યાતપક્ષાનિલાસ્ફાલનોદ્વેલપાથોધિ
વીચીચપેટાહતાગાધપાતાળભાઙ્કારસંક્રુદ્ધનાગેન્દ્રપીડાસૃણીભાવ-
ભાસ્વન્નખશ્રેણયે ચણ્ડતુણ્ડાય નૃત્યદ્ભુજઙ્ગભ્રુવે વજ્રિણે દંષ્ટ્રય
તુભ્યમધ્યાત્મવિદ્યા વિધેયા વિધેયા ભવદ્દાસ્યમાપાદયેથા દયેથાશ્ચ મે ॥ ૪॥

મનુરનુગત પક્ષિવક્ત્ર સ્ફુરત્તારકસ્તાવકશ્ચિત્રભાનુપ્રિયાશેખરસ્ત્રાયતાં
નસ્ત્રિવર્ગાપવર્ગપ્રસૂતિઃ પરવ્યોમધામન્
વલદ્વેષિદર્પજ્વલદ્વાલખિલ્યપ્રતિજ્ઞાવતીર્ણ સ્થિરાં તત્ત્વબુદ્ધિં પરાં
ભક્તિધેનું જગન્મૂલકન્દે મુકુન્દે મ્હાનન્દદોગ્ધ્રીં દધીથા
મુધાકામહીનામહીનામહીનાન્તક ॥ ૫॥

ષટ્ત્રિંશદ્ગણચરણો નરપરિપાટીનવીનગુમ્ભગણઃ ।
વિષ્ણુરથદણ્ડકોઽયં વિઘટયતુ વિપક્ષવાહિનીવ્યૂહમ્ ॥ ૬॥

વિચિત્રસિદ્ધિદઃ સોઽયં વેઙ્કટેશવિપશ્ચિતા ।
ગરુડધ્વજતોષાય ગીતો ગરુડદણ્ડકઃ ॥ ૭॥

કવિતાર્કિકસિંહાય કલ્યણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ॥

ઇતિ શ્રીવેદાન્તદેશિકવિરચિતઃ ગરુડદણ્ડકઃ સમ્પૂર્ણઃ ।

garuDa daNDakam (928 to 934)

A form of versification in which more syllables than 26 to a quarter (paada) are found is known as daNDakam in Sanskrit Prosody. This garuDa daNDakam has 108 syllables in each quarter (Vide shloka 933). The four sections numbered here as 929 to 932 are really four quarters of one shloka.

This work is in praise of garuDa (like garuDa pa nchAshat). shloka 932 enshrines garuDa-mantra. It is said that a Snake-charmer challenged deshika to defy a deadly serpent which he sent towards that AchArya, and on singing this daNDakam, garuDa appeared and carried away that snake.

The last shloka, however, says that this daNDakam about garuDa was sung by the all-knowing ve NkaTesha for the delectation of garuDa-dhvaja, Lord viShNu.

Encoded and proofread by Prasanna Vijay

*Shri Garuda Dandakam*
pdf was typeset on August 17, 2024

Please send corrections to *sanskrit@cheerful.com*